# प्रथमोऽध्यायः

# उपनिषदां परिचयः

# प्रथमोऽध्यायः

## उपनिषदां परिचयः

**प्रथमो विरामः** संस्कृतसाहित्ये उपनिषदां महत्त्वम्।

**द्वितीयो विरामः** उपनिषद् साहित्यस्योद्भवोविकासश्च।

**तृतीयो विरामः** वैदिकवाङ्मये उपनिषदां वैशिष्ट्यम्।

**चतुर्थो विरामः** उपनिषद्संख्या वर्ण्यविषयाश्च।

# प्रथमो विरामः

## संस्कृतसाहित्ये उपनिषदां महत्त्वम्

विश्वेऽस्मिन् अनेकाः भाषाः सन्ति। किन्तु संस्कृत भाषा देवभाषा दिव्यभाषा सम्पूर्ण भाषा च इति रूपेण स्वीक्रियते जनैः । यतोऽहि अस्यां भाषायां समस्त जगतः मुख्योद्देश्यानि प्रयोजनानि च अत्रैव प्राप्यते द्वितीयं कारणं इदमस्ति यत संस्कृतैव सर्वैवेदाः उपनिषदादयः प्राप्यन्ते। अनेन कारणेन :-१" संस्कृतं नाम दैवी वागिति सम्मतम्" मतमिदं ऋग्वेदस्य कथनेऽस्मिन्नाधृतम्। यथा तत्रोक्तं :-

१ - संस्कृतसाहित्येतिहासः

"दैवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्तिं।" दैवी वागेव कतिपयैर्विशेषैः प्रकृतिप्रत्ययसमवायैर्भूषितेति संस्कृतमप्युच्यते। इयमेव विश्वभाषासमुदायस्य मूलमिति भाषाविचक्षणा वदन्ति।

सामान्यतस्तु भाषा नाम व्या वाक् अर्थाद् भावाभिव्यये प्रयुानां सार्थकशब्दानां समष्टिरेव भाषेति कथ्यते ।

---

१ - ऋक् ८।१००।११

“भाव्यते व्यक्तरूपेण किञ्चिन्मनोगतमभिव्यज्यते इति भाषा”[1]

व्यक्तायां वाचि धातोः ‘गुरोश्च हलः’ इति स्त्रियामप्रत्यये टापि भाषेति सिध्यति यस्य योगार्थो भवति व्यक्तरूपेण जल्पनम् ।

तेन भाषाविद्भिर्भाषेत्थं परिभाषितास्ति :- - -

“ भाषा नाम यादृच्छिकवाचिकध्वनिसङ्केतानां सा पध्दतिर्यया जनां परस्परं विचारस्य विनिमयं कुर्वन्ति ” इति।[२]

अनेनैतत्सिध्यति यत् तादृशी यादृच्छिकरूढध्वनिसङ्केतप्रणलि भाषा भवति यामवलम्ब्य जनाः परस्परं विचारविनिमयं कुर्वन्ति।

जगत्यामनेका भाषाः सन्ति। संस्कृतभाषा निःशङ्कमेव विश्वभाषासु प्राचीना सुसंहता च । अस्याः प्राचीनत्वं न केवलं ग्रन्थत एवाऽपितु व्यवहारादपि सिध्यति। किन्तु अस्याः सम्प्रति यादृशं स्वरूपमस्ति तादृशमेवातिप्राचीनकालेऽप्यासीदिति नैव शक्यते निश्चेतुम्। तस्याः किल वैदिकलौकिकरूपयोरेव समुहदन्तर दृश्यते।भाषायाः साहित्यिकव्यावहारिकरूपयोर्महदन्तरमुत्पन्नं येन तत्सामञ्जस्य स्थापनाम

---

१ – संस्कृतसाहित्येतिहासः

२ – संस्कृतसाहित्येतिहासः

क्रमशः साहित्यिकरूपस्याऽपि नवीनतररूपं स्वीकृतं यल्लौकिकशब्देनाभिधीयते। इत्थं प्रकृतिरूपाया भाषायाः साहित्यिकं रूपमपि समजनि यस्मिन् गायन्तः स्वभूमिस्नेहेन रुदन्तस्ते उच्चसमस्थलीप्रदेशं प्राप्ता यत्र तैस्तादृशानामेव गायनानां सङ्ग्रहरूपेण वेदसङ्कलनं सम्पादितम् ।एतादृशे गायनादौ एकरूपताप्रयोजनमपेक्ष्य तत्र कतिचिन्नियमा अपि स्वीकृता येन भाषायाः साहित्यिकं रूपं संस्कृतं सञ्जातम्। पश्चात्तेनैव नाम्ना व्यवहृतञ्च। भाषितभाषारूपेण संस्कृतस्य स्वरूपे स्वाभाविके वैविध्यमपि दृश्यते इति।

**किं नाम साहित्यम् ?**

साहित्यं नाम शब्दार्थयोः सहितभावः।तच्च कमपि विषयमधिकृत्य प्रवर्तते ।तदेव तात्कालिकसामान्यमूल्यस्य दर्पणस्तान्निध्दारकञ्च । यस्य कस्यापि समुदायोत्कर्षस्य साहित्यमेव परं प्रमाणम् ।यथा यथा समुदाय औत्कर्ष्यं भजते तथा तथा तस्य साहित्यमपि उत्कृष्टतरं सञ्जायत एव। तेन साहित्यं भाषा - भाव - विषयनिमित्तं समाजस्याधर्मजं भवति मूल्यविस्थापने तस्य तदुपरि उत्तमर्णताऽपि। अतः साहित्यसमाजावन्योन्यस्य प्रयोजकौ भवतः।प्रतिसमाजं लिखितमलिखितं वा स्वानुकूलप्रकृतिकं साहित्यं तु भवत्येव किन्तु पूर्वमेवापरापेक्षया प्रभावि भवति स्थायिप्रकृतिकत्वाल्लि- पिबध्दतया। अपरञ्च अलिखितमपि साहित्यं कालान्तरे लिपिबध्दं भवत्येव। सम्प्रति ह्युपलब्धेषु सर्वेष्वपि साहित्येषु संस्कृतसाहित्यं प्राचीनतमं

परिष्कृतञ्च दृश्यते।” ह्युगल्ट टीवर्टस्य कथनं यत्संस्कृतसाहित्यं संस्कृतभाषा च नितान्तमेवा वास्तविके ते हि सिकन्दरस्य भारतविजयानन्तरं धूर्तब्राह्मणैर्ग्रीकसमाजीयादशा- धर्मणत्वेन रचितं प्रतिरूपंमात्रमिति तन्नितान्तमेवायथार्थं भ्रमात्मकञ्च। सम्प्रति तु तस्य प्राचीनत्वं याथार्थ्यञ्च निर्विवादमेव।

संस्कृतसाहित्यं न केवलमार्याणामेवापि तु मानवजातेरेवा -मूल्यऽक्ष -यश्च सांस्कृतिकनिधिः। अस्य रचनाचारुत्वमर्थनिधानं प्रतिपादितमूल्यञ्चेति त्रीणि मुख्यवैशिष्यामि यैरिदमितरसाहित्या -पेक्षया नितान्तोत्कर्षमावहति। अस्य विषयव्यापकत्वं तत्प्रतिस्पर्धिनोऽपि नतमस्तकान् करोति ।

अस्मिन् मानवजीवनस्य चत्वारो मुख्यपुरुषार्था धर्मार्थकाममोक्षाः साङ्गोपाङ्ग विवेचिताः सन्ति। अस्य किंवा वैदिकमुत वा लेकिकमपि साहित्यं समग्रमेव मानवमूल्यमात्मसात्कृत्य व्याख्याति। विश्वसाहित्यपेक्षया नितान्तप्राचीनतमसाहित्यरूपेणेदं सर्वेषामेव साहित्यनामादर्शो गुरुश्च।

अत्र च सर्वमेवमानवज्ञानं मूर्तिमत्त्वेनावभासते । अज्ञातकालादा- रभ्याद्य यावद् धाराप्रवाहसततं प्रवर्तमानमिदं नेकासां सभ्यतानां संस्कृतीनां सृष्टीनां प्रलयानाञ्च साक्षित्वेनापि विराजते। अत्र हि चत्वार एव सखशाखा वेदाः ब्राह्मणानि - आरण्यकाणि - कल्पसूत्राणि - गृह्यसूत्राणि - शूल्वसूत्राणि - शिक्षा - व्याकरणानि - निरुक्तं -

छन्दांसि - ज्योतिषं - धनुर्वेदम् -आयुर्वेदः - गान्धर्ववेदम् - अर्थशास्त्रं - पुराणानिः - शिल्पशास्त्राणि - धर्मशास्त्राणि - काव्यानि -लक्षणशास्त्रम् - अलंकारशास्त्रम् - आगमाः - दर्शनानि च स्वरूपभ-दोपभेदयुतानियथायर्थं प्रकरणानुरूपं समुपवर्णिताः सन्ति। तदित्थं गरिमामण्डितं संस्कृतसाहित्यं कदा कथमुत्पन्नमिति जिज्ञासा सर्वेषां भवत्येव किन्तु तत्तर्पणं न तथा सूकरम् । अपौरुषेयत्वेन वाऽज्ञातपौरुषेयत्वेन वा प्रथमं तु वेदा एव श्रुति पथ मागताः। वेदमन्त्राणामुच्चारणज्ञानाय शिक्षाः प्रणिताः श्रौतगृह्यादिकर्मज्ञानाय श्रौत - गृह्य - शुल्वसूत्राणि प्रणीतानि । शब्दानां साध्वसाधूत्वविवेचनाय व्याकरणमाविष्कृतम् । भगवान् खलुशङ्करः प्रथमो वैयाकरणो द्वितीयश्व बृहस्पतिस्तृतीय इन्द्रः। शब्दनिर्वचनज्ञानाय निरुक्तग्रन्था निर्मिताः। वेदमन्त्राणां वृतज्ञानाय छन्दः शास्त्र प्रवर्तितम्। वेदोक्तकर्मनिमित्तककालज्ञानाय ज्यैातिषमपि व्याख्यातम्। इत्थं वेदानां षडङ्गानि व्याख्यातानि । तथैव ऋग्वेदात्सारमादाय आयुर्वदो व्याख्यातः । यर्जुवेदस्य साररूपेण धनुर्वेदः प्रणीतः। सामवेदस्य सारत्वेन गान्धर्ववेदो निर्मितः अथर्ववेदस्यसाररूपेण अर्थवेदः शिल्पशास्त्रं वार्ताशास्त्रं वाणिज्यशास्त्रं चेत्याद्या प्रणीताः। वेदोक्तधर्मव्याख्यानाय धर्मशास्त्राण्यपि प्रणितानि वेदार्थोपबृहकं पुराणसाहित्यमपि बहुशाखात्वेन प्रणीतम्। तत्तच्छाब्दबोधनाय कोषसाहित्यमपि प्रचालितम्। काव्य साहित्य गद्य - पद्य - चम्पू - दृश्त - श्रव्याद्यनेकप्रकारा अपि उन्नायिताः। जीवजगदीश्वरस्वरूपज्ञानाय बहुशाखं

**दर्शनशास्त्रं प्रणीतम्** ः--

ततश्च उपासना ज्ञानकर्मविवेचनाय उपनिषद् ग्रन्थाश्च प्रणीताः इत्थं लैकिकसाहित्यमेव आयुर्वेद - ज्योतिष - व्याकरण-काव्य-दर्शन-कोष - धर्म - अर्थ-काम सम्बध्दानि अनेकानि संस्कृतसाहित्यानि स्वरूपतामायातानि।

संस्कृतसाहित्ये उपनिषदां महत्त्वं वर्णनातीतमेव संस्कृतसाहित्ये उपनिषदो हि शीर्षाणीत्युच्यन्ते। विशेषेण अविद्याविद्याया भेदप्रदर्शन- पूर्वकमध्यात्मविद्या ज्ञानकर्मणोः समन्वयः निष्काम कर्मस्याःसन्देशः जीवात्मनः परमात्मांशत्व निर्गुणोपास्यब्रह्मयोरन्तरं सर्वशक्तिमत्व प्रतिखादनमित्यस्याः संस्कृतसाहित्ये गुम्फिताऽस्ति।

**संस्कृतसाहित्ये** ः--

ज्ञानकर्मभ्यामेवाविद्यानिवृत्तिर्यतोऽपवर्गसिध्दिर्नान्यतरेण । तेनासौ

भेदाभेदविचाराः ज्ञानकर्मसमुच्चयबाद एव। तत्र पूर्वपूर्वमूर्त्युपासनया पुरुषार्थ प्रतिपन्थिदुरितनिचक्षये सति उत्तरोत्तरमूर्त्युपासनायामधिकारः सम्पद्ये । जीव संसारी कर्मानुसारसुखदुःख भोक्ता जन्ममरणधर्माच।

परमात्मा हि जगतो नित्यकारणमुपादानकारणन्तु प्रकृतिरेव। तत्र हि ईश्वरस्य जीवाद्भेदः जीवस्य जडाद्भेदः। एतादृशपञ्चविधभेदज्ञानमेव मुक्तिसाधकम् । उपासना च शास्त्राभ्यासाद् ध्यानाच्च भवति।

तत्र विषयान्तरतिरस्कातपूर्वकभगवद्विषयिकाऽखण्डस्मृतिरेव ध्यानम्। भगवदनुग्रहमन्तरा जीवो न किञ्चिदपि कर्तुं प्रभवति। मुक्तिस्त्वनुग्रह्म विशेषमात्रलभ्या । ज्ञानेन भक्तिर्भक्त्याऽनुग्रहोऽनु- ग्रहान्मुक्तिः। सा च चतुर्विधा कर्मक्षयोत्क्रान्त्यचिरादिमार्गभोगभेदात् । चरमोऽपि सालोक्य - सामीप्य - सारुप्य - सायुज्यभेदाच्चतु -र्विधः। जाग्रत्स्वप्नसुषुप्तितुरीयावस्थस्य चैतन्यस्याधिपत्योनात्मनो वैश्वानर- तैजसप्राज्ञशिवोतिप्रकारनिरूपणम्।

" उपनिषादयति सर्वानर्थकरसंसारं विशाययति संसारकारण-

भूतामविद्यांच शिथिलयति ब्रह्म च गमयति इति उपनिषद्। "[1]

---

१ – उपनिषद् भाष्य

**संस्कृतसाहित्ये उपनिषदां महत्वम् ः-**

संस्कृत वाङ्मये अनेके ग्रन्थाः सन्ति। तथापि तेषु उपनिषदः सर्वोपरि ग्रन्थरत्न रूपेण स्वीक्रियन्ते। यथोक्तं ः-

यत्तदद्रेश्यमग्राह्यमग्रोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादम्।

नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं परिपश्यन्ति धीराः॥

उपनिषदां हि संस्कृत - साहित्य - जगतः सर्वोत्कृष्टरत्नम् ।

हि ब्रह्मविद्योपासना ॐकारोपासना जीवात्मा ज्ञानस्वरूप एव न तु ज्ञानगुणकः। निःश्रेयसमस्य मुख्यत्वेन प्रतिपाद्यविषयम्।जीवात्मा सुखदुःखादि विषयी परमात्मा तु शुध्दः। परमात्मा तु तद्विलक्षण ईश्वरः। तत्त्ज्ञानेन मिथ्यावासना निवर्तते ततश्च यः सुखदुःखापगमः स एव मोक्ष इति उपनिषदां रहस्यमिति ।

निरातिशयानन्द प्रियानन्य प्रयोजनसकलेतरवैतृष्यवान् ज्ञानविशेष एव भक्तिः। तत्सिध्दिश्च विवेकादिभ्यः । आहारशुध्देः सत्त्वशुध्दिः सत्त्वशुध्देर्विमुक्तिरिति।

संस्कृतसाहित्ये आध्यात्मिकाविकासक्रमो गुणस्थानम्। तच्चतुर्दशविधं - मिथ्यात्वग्रन्थि भेदमिश्र विरति - देशविरति प्रमतापूर्वकरणानिवृत्तिकरण - सूक्ष्म -

सम्पराय -उपशान्तमोह-संयोग - केवलायोग - केवलेतिभेदात्। एभिरुपर्युपरि गच्छन् सधकः सिध्दि माप्नोति। उपनिषदां हि जीवः परमशान्तिमनुभवन् मुक्तः सञ्जायते।

अहिंसा - सत्या - स्तेया -परिग्रह - ब्रह्मचर्याणां साधनैव सम्यक् चारित्र्यम्। इदमेव मुक्तेर्योनिः।तत्र ब्रह्मचर्य यतीनां परमावश्यकं गृहमेधिनां स्वयोषिति रतिरनुमता सप्रतिबन्धा। मोक्षस्तु जीवस्य आवरणरहितत्वम्।स च सम्यग् दर्शन - ज्ञान - चारित्र्योतिरत्न सम्भवति।

"सम्यग्दर्शनज्ञान चारित्र्याणि मोक्षमार्गः" इति।

स्वभावतो मुक्तोऽपि जीवोऽविद्यावासनाजन्यकर्मवरणेन बध्दो भवति तस्यच्छेदस्ततो मुक्तितिरि।

**संस्कृतसाहित्ये तैतिरीयोपनिषदियं उपदेशः :-**

वेदमनूच्याचार्योऽन्ते वासिनमनुशास्ति। सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः ।आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेसीः। सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम्।स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्या न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि। नो

इतराणि। ये के चास्मच्छ्रेया ॱ सो ब्राह्मणाः।तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रध्दया देयम् । अश्रध्दयादेयम्। श्रिया देयम्। ह्रिया भिया देयम्। संविदा देयम्।

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः।युक्ता आयुक्ता। अलूक्षा धर्मकामाःस्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः।युक्ता आयुक्ता। अलूक्षा धर्मकामाःस्युः। यथा ते तत्र वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः । एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम् । एवमु चैतदुपास्यम्।

इत्थं सुसमृध्दमुपनिष संस्कृतसाहित्योद्याने सदापुष्पितं परागं समुपलब्धास्ति ।

# द्वितीयो विरामः

## उपनिषद् साहित्यस्योद्भवोविकासश्च

संस्कृतजगति आधुनिकसमये समीक्षाकाराणां दृष्ट्या यस्य कस्यापि अध्ययनं यदि स्यात् तदा तद् विषयस्य प्रादुर्भावः कदा जातः केन कृतः कथं कृतः इत्यादीनाम् प्रश्नानां समाधानमावश्यकं भवति । अनेन कारषेन विषयेस्मिन् अपि समाधानं क्रियते यत् उपनिषद् साहित्यस्य उद्भवः कदा अभवत् इति ॥

उपनिषदो हि वेदानां शीर्षाणीत्युच्यन्ते । आध्यामिकजगति उपनिषदां महत्त्वं वर्णनातीतमेव। उपनिषदां विषये विचारकाणां द्विविधा मतिवर्तते । वेदान्तिनो वैदिकाश्च स्वीकुर्वन्ति यत् इमास्सर्वा उपनिषदः वेदस्यैव भागविशेषाः सन्ति वेदाश्च सर्वेऽपौरुषेयास्सन्ति कस्यचनापि ते रचनाः नहि सन्ति श्वेताश्वतरोपनिषद्युक्तं हि "तस्य निःश्वसितं वेदा "[1] इति। अयमर्थो यत् परमात्मनः निःश्वासभूतास्सन्ति वेदाः येन प्रकारेण वयं स्वकीयानां श्वासप्रश्वासादीनां निर्मातारो न हि भवामः तेनैव प्रकारेण –

---

१ – श्वेताश्वतरोपनित् – तथा च –नारद पुराण।५।११।

परमात्मापि स्वश्वासभूतानां वेदानां निर्माता न भवति अपि सृष्टेरादो सः पूर्वकल्पेषु विद्यमानमेव वेदं स्मारं – स्मारं तस्योपदेशं ब्रह्मणे करोति तथान्या

श्रुतिः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्म बुध्दि प्रकाशं मुमुक्षुर्वै शरणमहंप्रपद्ये ॥ इति श्रुतिः

**वेदानां नित्यत्वं प्रतिपादयति ऋग्वेदियोऽपि मन्त्रो वक्ति यत् :-**

यज्ञेन वाचः पदवीयमापयन्तामन्वविन्दन्नृतितिर्षुः प्रविष्टाम् ।[1]

तथैव वेदानां नित्यत्वं प्रतिपादयन्ती व्यासस्मृतिर्बूत :-

युगान्तेन्तर्हितान् वेदान् सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयं भ ुवा॥ शारीरकमीमासायाः अत एव च नित्यम्। समान नामरूपत्वावृतावप्यविराधो दर्शनात् स्मृतेश्च।[3]

इत्यनयोः सूत्रयोः भगवान् बदरायणोऽपि वेदानां नित्यत्वपौरुषेयत्वं च समर्थयति। इत्येतन्मतानुसारेण वेदानामुपनिषदां वा काल विचारस्य प्रश्न एव ब ल्युद्येति परञ्चार्वाचीनाः वेदानां कृतकत्वमेवापादयन्ति निर्धारयन्ति च स्वस्वमतानुसारेण तेषां कालम् अत एव तेषामेव मतानुसारेणोपनिषदा।

---

१ –ऋग्वेद संहिता –१० ।५१ ।३

२ –ब्रह्मसूत्र – १ ।३ ।३० । सूत्रस्य शांकर भाष्ये उध्दृता स्मृतिः।

३ –शारीरकमीमासा – ९ ।३ ।२८ –२९

**कालविषये काचन चर्चा उपस्थाप्यते तथाहि :-**

- मैक्समूलरमहोदयः वेदानां कालम् १४०० ई।पू।मन्यते।
- विन्टर नित्जमहोदयः वेदानां कालम् ४५०० ई।पू।मन्यते।
- तिलक महोदयः जैकाबीमहोदयः अविनाश चन्द्रदास महोदयश्च वेदानां कालम् २५००ई।पू।अभ्युपगच्छन्ति।
- डाँ राधाकृष्णन् वेदानां कालम् ८०० ई।पू। मन्यते।
- पाणिनी महाभागः वेदानां कालम् ७०० ई।पू। मन्यते।

इमे समे अर्वाचीनाः ऐतिहयविदो वदन्ति यदुपनिषदां रचना वेदानां रचनायाः पञ्चशतवर्षाणामन्तरभवदिति परञ्चैतत्सर्वं पाश्चात्य- विचारकाणां भ ारतीयानामप्याधुनिकानां विचारकाणांकथनं वर्तते यन्नहि संवदति भ ारतीयानामास्तिकानां दार्शनिकानां विचारेभ्यः।

# तृतीयो विरामः

## वैदिकवाङ्मये उपनिषदां वैशिष्ट्यम्

वैदिक वाङ्मयस्य सर्वातिशायिवैशिष्ट्यं न शब्दैरभि व्यक्तुं शक्यते । यदेव संस्कृतसाहित्यस्य वैशिष्ट्यं तत्सर्वमपि वैदिक- वाङ्मयस्यैवेति नातिशयोक्तिः। वेदाः खलु मानवज्ञानस्य विश्वकोषस्तेन तत्र किमस्तीति अनुसन्धानस्यपेक्षया किं नास्तीतिगवेषणं सुकरं भवति। वेदाः खलु विश्वस्यैव प्राचीनतमं साहित्यम्।अत एवोक्तं वेदाःखलु तस्य महाभूतस्य निःश्वसितमेतादिति। तत्रैव सम्पूर्ण भारतीय वाङ्मयस्योप- जीव्यं विद्यते। तस्यान्तः स्पर्शमन्तरा भारतीयजीवनस्य न कोऽपि पक्षः शक्यते ज्ञातुम्।

वैदिक वाङ्मये उपनिषदां वैशिष्ट्यम् वर्णनातीतमेव। उपनिषदो हि वेदानां शीर्षाणीत्युच्यन्ते । यथोपनिषद् वेदानां शीर्षमिति तस्य प्राधान्यं सर्वत्र सम्मतम्। ज्ञान कर्मणोः समन्वयः साधितस्तथैव निष्काम कर्मस्याः सन्देशः। एवमेव अविद्याविद्याया भेदप्रशन - पूर्वकमध्यात्मविद्या निरुपितास्ति। शरीरं तु भस्मान्तमेव तस्य क्रतुः कृतमेव हि स्मृति विषया भवन्ति। निष्कर्मणां जीवनेऽपि नाधिकारः यदि कश्चिदपूर्ण जीवनमुपभोक्तुमिच्छति तदा स कर्म कुर्यादेव।

आत्माभीष्टमेव कर्म कर्तव्यं न तु तद्वीपरीतम्। पराबाधेन सर्वैर्जीवितव्यं न तु परपीडया। निर्गुणोपास्य ब्रह्मयोरन्तरं रहस्यात्मक- रूपनिरूपणम्। सर्वशक्तिमत्त्वप्रतिपादनमित्यस्याः जीवात्मनः परमात्मांशत्व - प्रतिपादिकेयमुपनिषद् संवादरूपेण निष्कामभावश्चा- स्याः सर्वातिशासि वैशिष्ट्यम्। प्राणस्य महिमा तथातत्स्वरूपम्ओङ्कारस्योपासनापरब्रह्मण- आध्यात्मिकदृष्टयोपासनविधिः ब्रह्मणोः जगदधिष्ठातृत्वप्रतिपादन मित्यस्य ब्रह्मणो वेदानाञ्च व्याख्या ब्रह्मणः स्वभावस्य पराऽपरविद्याप्रतिपादनमेवास्य वशैष्ट्यम्। जाग्रत्स्वप्नसुषुप्तितुरीयावस्थस्य चैतन्यस्याधिपत्ये- नात्मनो वैश्वानर- तैजसप्राज्ञशिवेति प्रकार वेदमन्त्राणामुच्चारण- नियमाः स्नातकशिक्षा ब्रह्मप्राप्तिसाधनानां निरूपणम् ब्रह्मविद्याविवेचनञ्च अन्नप्राणमनोविज्ञानानन्दमय कोषानां ब्रह्मणो निवासश्च ब्रह्मप्राप्तिसाधनस्वरूपता वर्णनं आत्मनो जगतः सृष्टिः जीवानां जन्मजीवननिधनावस्थानां प्रज्ञानमाहात्म्य चैतन्यतत्त्व अद्वैततत्त्वमीमांसा पुनर्जन्मविवेचनञ्च निगूढदार्शनिकतत्त्व परमात्मनो विविधप्रकारेण प्रतीकरापासना अनेकाविध विद्यानां निरूपणम् ओङ्कारस्य गूढरहस्य विवेचनमिति । ब्रह्मणः सार्वरूपत्वं चातुर्वर्ण्यसृष्टिः अन्नानामुत्पत्तिः मनोवचन प्राणरूपेण सृष्टिर्विभागः मधुविद्याया उपदेशः आतमनो विविधरूपाणां वर्णनं ब्रह्मात्मनो शिक्षेत्याद्या रुद्रमाहात्म्य परमात्मनो जगन्नियन्तृत्व प्रतिपादनं योगशैव - सिध्दान्तसाङ्ख्ययोगादिविवेचनं गुरुभ

क्तिः मायाधि -पतित्वेन महेश्वरवर्णनञ्च वेदान्त योगशास्त्रा - दीनामपि वर्णनादीति वैदिक वाङ्मये उपनिषदां वेशिष्टयमिति।

श्रुतिस्मृतीतिहासादिषु ज्ञानस्यैव मोक्षसाधनत्वावगमाद्युज्यत एवोपनिषदारम्भः। किंचोपनिषत्समाख्ययैव ज्ञानस्यैव परमपुरुषार्थ - साधनत्वमवगम्यते। तथा हि । उपनिषदित्युपनि पूर्वस्य सदेर्विशरण- गत्यवसादनार्थस्य रूपमाचक्षते। पनिषच्छब्देन व्याचिख्यासितग्रन्थप्रति पाद्यवस्तुविषया विद्योच्यते। तादर्थ्याद् ग्रन्थोऽप्युपनिषत् । ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छविदतविद्यां तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद् विनाशात्परब्रह्म गमयितृत्वाद् गभ जन्मजरा मरणा - द्युपद्रवावसादयितृत्वादुप -निषत्समाख्ययाऽप्यन्यकृतात्परं श्रेय इति ब्रह्मविद्योपनिषदुच्यते। ननु भवेदेवमुपनिषदारम्भो यदि विज्ञानस्यैव मोक्षसाधनत्वं भवेत्। न चैतदस्ति। कर्मणामपि मोक्षसाधनत्वावगम् । अपाम सोममममृता अभूम। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिना। न त्वेतदस्ति । श्रुतिस्मृतिविाधान्न्यायविराधाच्च । श्रुतिविरोधस्तावत्। तद्यथेह कर्मचितोलोकः क्षीयते। तमेवं विद्वानमृत इह भवति नाानयााःपन्था विद्यतेऽयनाय। न कर्मणा न प्रजया धनेन त्यागे नैके अमृतत्वमानशुः।

वैदिक वाङ्मये उपनिषदां खलु भारतीयार्थसंस्कृतेरमुल्यो निधिः। तेष्वेव अनादिकालोपार्जितं मल्यूं सञ्चितमस्ति।ते हि खलु पुरुषार्थचुतुष्टयस्य साधकाः । धर्माचरणाय ते खलु यज्ञसम्पादनेन सहैव ऋत - सत्य - दीक्षा -तपो ब्रह्मादीनामपि रूपं निर्धारयन्ति। यथोक्तं -

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।[१]

इत्थं वैदिक वाङ्मये उपनिषदां धर्मार्थकाममोक्षाणां चतुर्णामेव वर्गाणांसाधकाः। ते तु यज्ञसम्पादनद्वारा धर्ममाचारयन्ति। सत्यऋतदीक्षातपोब्रह्मादिभिश्च। कृषिवाणिज्यपधुपालन शिक्षया अर्थोपार्जनमुपदिशन्ति। परिमितभोग सहजीवनगृहस्थोपपदेशाभिः कामसेवनमुपदिसन्ति। एकेश्वरऽभक्तिसर्वसमानभ ाविशिक्षया मोक्षधर्म -मुपदिसन्ति। ते हि त्रैगुण्यविषयं तु शिक्षयन्त्येव गुणातीतविषयमपि ते प्रतिपादयन्ति।सर्वातिशायित्वेन वैदिक वाङ्मये उपनिषत्सु कर्मोपदिशन्ति।

इत्थं सुसमृध्दमुपनिषत्साहित्यं वैदिक वाङ्मयोद्याने सदा पुष्पितं कुसुम यदादाय पाश्चात्यका अपि समालोचका नतमस्तकाभवन्ति भारतीयानां तु का कथा॥[२]

- - - - - - -- - -- - -

१ -अथर्व ः-१२।१।१

२ संस्कृतसाहित्येतिहासः - लोकमणिदहाल

# चतुर्थो विरामः

## उपनिषद्संख्या वर्ण्यविषयाश्च

**प्रकाशितानामुपनिषदां संख्या नामानि च :--**

बहोः कालात् प्राक् वारणसितः 'अष्टोत्तरशतोपनिषत्' नाम्ना प्रकाशनं सञ्जातमुपनिषदां संग्रहस्य तत्र द्वादशोत्तरशतसंख्यकानामुनिषदां संग्रहो विद्यते '१९७०' खैष्टाब्दे मोतिलाल बनारसीदास संस्थानातः निम्नांकितानामुपनिषदां संग्रहः प्रकाशितोऽभूत तथा चोपनिषदां नामानि ::---

- ईशावास्योपनिषद्
- केनोपनिषद्
- कठोपनिषद्
- प्रश्नोपनिषद्
- मुण्डकोपनिषद्
- माण्डुकोपनिषद्
- तैत्तिरीयोपनिषद्
- ऐतरेयोपनिषद्

- छान्दोग्योपनिषद्
- बृहदारण्कोपनिषद्
- श्वेताश्वतरोपनिषद्
- ब्रह्मबिन्दूपनिषद्
- कैवल्योपनिषद्
- जाबालोपनिषद्
- हंसोपनिषद्
- आरुणिकोपनिषद्
- गर्भोपनिषद्
- नारायणाथर्वशिरउपनिषद्
- महानारायणोपनिषद्
- परमहंसोपनिषद्
- ब्रह्मोपनिषद्
- अमृतनादोपनिषद्
- अथर्वशिरउपनिषद्
- अथर्वशिखोपनिषद्
- मैत्रायण्युपनिषद्

- कौषीतकिब्राह्मणोपनिषद्
- बृहज्जाबालोपनिषद्
- नृसिंहपूर्वतापनीयोपनिषद्
- नृसिंहोत्तरतापनीयोपनिषद्
- कालाग्निरुद्रोपनिषद्
- मैत्रेय्युपनिषद्
- सुबालोपनिषद्
- क्षुरिकोपनिषद्
- मन्त्रिकोपनिषद्
- सर्वसारोपनिषद्
- निरालम्बोपनिषद्
- शुकरहस्योपनिषद्
- वज्रसूचिकोपनिषद्
- तेजोबिन्दूपनिषद्
- नादबिन्दूपनिषद्
- ध्यानबिन्दूपनिषद्
- ब्रह्मविद्योपनिषद्

- योगतत्त्वोपनिषद्
- आत्मप्रबोधोपनिषद्
- नरदपरिव्राजकोपनिषद्
- त्रिशिखिब्राह्मणोपनिषद्
- सीतोपनिषद्
- योगचूडामण्युपनिषद्
- निर्वाणोपनिषद्
- मण्डलब्राह्मणोपनिषद्
- दक्षिणामूर्त्युपनिषद्
- शरभोपनिषद्
- स्कन्दोपनिषद्
- त्रिपाद्विभूतिमहानायणोपनिषद्
- अद्वयातारकोपनिषद्
- रामरहस्योपनिषद्
- श्रीरामपूर्वतापिन्युपनिषद्
- श्रीरामोत्तरतापिन्युपनिषद्
- वासुदेवोपनिषद्

- मुद्गलोपनिषद्
- शाण्डिल्योपनिषद्
- पैङ्गलोपनिषद्
- भिक्षुकोपनिषद्
- महोपनिषद्
- शारीरकोपनिषद्
- योगशिखोपनिषद्
- तुरीयातीतोपनिषत्
- संन्यासोपनिषत्
- परमहंसपरिव्राजकोपनिषत्
- अक्षमालिकोपनिषत्
- अव्यक्तोपनिषत्
- एकाक्षरोपनिषत्
- अन्नपूर्णोपनिषत्
- सूर्योपनिषत्
- अक्ष्युपनिषत्
- अध्यात्मोपनिषत्

- कुण्डिकोपनिषत्
- सावित्र्युपनिषत्
- आत्मोपनिषत्
- पाशुपतब्रह्मोपनिषत्
- परब्रह्मोपनिषत्
- अवधूतोपनिषत्
- त्रिपुरातापिन्युपनिषत्
- दैव्युपनिषत्
- त्रिपुरोपनिषत्
- कठरुद्रोपनिषत्
- भावनोपनिषत्
- रुद्रहृदयोपनिषत्
- योगकुण्डल्युपनिषत्
- भस्मजाबालोपनिषत्
- रुद्राक्षजाबालोपनिषत्
- गणपत्युपनिषत्
- जाबालदर्शनोपनिषत्

- तारसारोपनिषत्
- महावाक्योपनिषत्
- पञ्चब्रह्मोपनिषत्
- प्राणाग्निहोत्रोपनिषत्
- गोपालपूर्वतापिन्युपनिषत्
- गोपालोत्तरतापिन्युपनिषत्
- कृष्णोपनिषत्
- याज्ञवल्क्योपनिषत्
- वराहोपनिषत्
- शाट्यायनीयोपनिषत्
- हयग्रीवोपनिषत्
- दत्तात्रेयोपनिषत्
- गारुडोपनिषत्
- कलिसन्तरणोपनिषत्
- जाबाल्युपनिषत्
- गणेशपूर्वतापिन्युपनिषत्
- गणेशोत्तरतापिन्युपनिषत्

- संन्यासोपनिषत्
- गोपीचन्दनोनिषत्
- सरस्वतीरहस्योखनिषत्
- पिण्डोपनिषत्
- महोपनिषत्
- बह्वृचोपनिषत्
- आश्रमोपनिषत्
- सोभाग्योलक्ष्म्युपनिषत्
- योगशिखोपनिषत्
- मुक्तिकोपनिषत्
- योगराजोपनिषत्
- अद्वैतोपनिषत्
- आचमनोपनिषत्
- आत्मपूजोपनिषत्
- आर्षेयोपनिषत्
- इतिहासोपनिषत्
- चतुर्वेदोपनिषत्

- चाक्षुषोपनिषत्
- छागलेयोपनिषत्
- तुरीयोपनिषत्
- द्वयोपनिषत्
- निरुक्तोपनिषत्
- पिण्डोपनिषत्
- प्रवणोपनिषत्
- बाष्कलमन्त्रोपनिषत्
- मठाम्नायोपनिषत्
- विश्रामोपनिषत्
- शौनकोपनिषत्
- सूर्यतापिन्युपनिषत्
- स्वसंवेद्योपनिषत्
- ऊर्ध्वपुण्ड्रोपनिषत्
- कात्यायनोपनिषत्
- गोपीचन्दनोपनिषत्
- तुलस्युपनिषत्

- नारदोपनिषत्
- नारायणपूर्वतानीयोपनिषत्
- नारायणोत्तरतापनीयोपनिषत्
- नृसिंह्मषट्चक्रोपनिषत्
- पारमात्मिकोपनिषत्
- यज्ञोपवीतोपनिषत्
- राधोपनिषत्
- लाङ्गूलोपनिषत्
- श्रीकृष्णपुरूषोत्तमसिध्दान्तोपनिषत्
- सङ्कर्षणोपनिषत्
- सामरहस्योपनिषत्
- सुदर्शनोपनिषत्
- नीलरुद्रोपनिषत्
- पारायणोपनिषत्
- विल्वोपनिषत्
- मृत्युलाङ्गूलोपनिषत्
- रुद्रोपनिषत्

- लिङ्गोपनिषत्
- वज्रपिञ्जरोपनिषत्
- वटुकोपनिषत्
- शिवसङ्कल्पोपनिषत्
- शिवोपनिषत्
- सदानन्दोपनिषत्
- सिध्दान्तशिखोपनिषत्
- सिध्दान्तसारोपनिषत्
- हेरम्बोपनिषत्
- अल्लोपनिषत्
- आथर्वणोद्धितीयोपनिषत्
- कामराकीलितोध्दारोपनिषत्
- कालिकोपनिषत्
- कालीमेधादीक्षितोपनिषत्
- गायत्रीरहस्योपनिषत्
- गायत्र्युपनिषत्
- गुह्यकाल्युपनिषत्

- गुह्यषोढान्यासोपनिषत्
- पीताम्बरोपनिषत्
- राजस्यामलारहस्योपनिषत्
- वनदुर्गोपनिषत्
- श्यामोपनिषत्
- श्रीचक्रोपनिषत्
- श्रीविद्यातारकोपनिषत्
- षोढोपनिषत्
- सुमुख्युपनिषत्
- हंसषोढोपनिषत्

सर्वासामुपनिषदां प्रायो वर्ण्यविषयाःतत्त्वहितपुरुषार्था एव सन्ति। अत्र तत्त्वशब्देन चेतनाचेतनेश्वरा एवाभिधीयन्ते वस्तुतः तत्त्वशब्देन पारमार्थिकाः विषया एवाभिधीयन्ते तानि च तत्त्वानि त्रीण्येव सन्ति चेतनाचेतनेश्वरा इति। अत एव तत्त्व शब्देन तत्त्वत्रयस्याभिधानं भवतितथा चोक्तं पिल्लैलोकाचार्येण तत्त्वत्रयनाम्नि ग्रन्थे।

तत्त्वत्रयं नाम चिदचिदीश्वरश्च ।[1]

जीवप्रकृतीश्वराणां समुदितं नाम तत्त्वत्रयम् मोक्षवाप्तये एतेषां तत्त्वाना। ज्ञानमावश्यकं भवति इति प्रतिपादयता श्रीमल्लोकचार्येणाभिहितम्।

मुमुक्षोश्चेतनस्य मोक्षसिध्द्ये तत्त्वत्रयज्ञानमावश्यकमिति ।[2]

तत्त्वत्रयमेव वैदिकानां सारतमः सध्दान्तिकोऽर्थः तत्त्वत्रयस्यैव प्रतिपादने सर्वेषामुपनिषद् वाक्यानां परमं तात्पर्यमिति वैदिक अभि प्रयन्ति।चेतनो जीव तत्र चित् चेतनो जीव प्रत्यक् आत्मा प्रभृतयः शब्दाः समानार्थकाः इति शब्दविदः।अचेतनम् अचित् प्रकृति माया प्रधानम् अजा इत्यादिकाः अपि शब्दाः समानार्थकस्सन्ति उपनिषत्सु परब्रह्म - परमात्मा -

ईश्वर - महेश्वरेत्यादिकाः शब्दा परंब्रह्माभिदधन्ति।

भोक्ता भोग्यं प्रेरितारञ्च मत्वा ।[3] ज्ञाज्ञौ द्वावजावीशनीशौ ।[4]

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।[5]

---

१ -पल्लिै लोकाचार्य :- तत्त्वत्रये चित्प्रकरण-पृष्ठम् -५।

२ - पल्लिै लोकाचार्य :- तत्त्वत्रये चित्प्रकरण-पृष्ठम् - १।

३ - श्वेताश्वतरोपनिषत् -१।१२

४- श्वेताश्वतरोपनिषत् -१।९

५ - श्वेताश्वतरोपनिषत् -१।१०

प्रधान क्षेत्रज्ञपतिर्गुणेशः इतयादिकाः श्रुतयः।[1]

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥[2]

उत्तमः पुरुषत्वन्यः परमात्मेत्युदाहृतः।[3]

यस्मात् क्षरमतीतोऽहमक्षरादपिचोत्तमः।तस्माल्लोके च वेदे च प्रथितः पुरुषोत्तमः॥[4]

१ -नेतरोऽनुपपत्तेः।

२ - भेदव्यपदेशाच्च।

३ -अनुपपत्तेस्तु न शारीर।

४ -कर्मकतृ व्यदेशाच्च।

५ - संभोगप्राप्तिरितिचेन्न।

६ - मुक्तोपसृत्यवयपदेशाच्च।

७ - सुषुप्त्यत्क्रान्त्योर्भेदेन ।

८ - अधिकं तु मोदनिर्देशात्।

---

१ - श्वेताश्वतरोपनिषत् -६।१६

२ -श्रीमद्भगवद्गीता १५-१६

३ - श्रीमद्भगवद्गीता १५-१७-

४ - श्रीमद्भगवद्गीता -१५-१८

इत्यादीनि सूत्राणि च तत्त्वत्रयस्य स्वरूपयाथात्म्यं तस्यपारस्परिकसम्बन्धम् भेदांश्च प्रतिपादयन्ति। हितशब्देन आत्मोज्जीवनसाधनानि उच्यन्ते तानि च सन्ति कर्मयोग - ज्ञानयोग - भक्तियोग - प्रपत्तियोगादीनि । पुरुषार्थ शब्देन च चत्वारः धर्मार्थकाममोक्षाख्याःउच्यन्ते तत्रापि मोक्ष एव परमः पुरुषार्थ इति ।

उपनिषदं परंब्रह्मशब्देन क्वचन ब्रह्मशब्देन क्वचन ईश्वरशब्देन च परस्य ब्रह्मणो निरूपणं कुर्वन्ति।

सत्यं ज्ञान मनन्तं ब्रह्म। इति श्रुतिः ब्रह्मणः सत्यस्वरूपतां अनन्तस्वरूपतां च प्रतिपादयति।[1]

यः सर्वज्ञःसर्ववित्। इति श्रुतिर्वक्ति यत्।[2]

ईश्वरःसर्वाणि वस्तूनि यस्मात् सामान्यतो जानाति अत एव सर्वज्ञो वर्तते यस्मात्त्वकारणात् सःसर्वाणि वस्तूनि विशेषतो जानाति अत एव सर्ववित् वर्तते।

---

१ - तैत्तिरीयोपनिषत् २।१।१

२ -मुण्डकोपनिषत् १।२।९

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।[१]

आनन्दं ब्रह्मणो विद्वान् । इति श्रुतिः ।[२]

ब्रह्मणो वाचामविषयत्वं प्रतिपदयति यतःतस्य कात्स्र्येन वर्णनं कर्तुं न शक्यते तच्च ब्रह्म आनन्दमयं विद्यते इति वक्ति श्रुतिः ।

आनन्दमयोऽभ्यासात् ।[३]

इति शारीरकसूत्रमपि ब्रह्मण आनन्दमयत्वं प्रतिपादयति । यतो वा इमानिभुतानि जायान्ते येन जातानि जीवन्ति यत्प्रत्यभिसंभविशन्ति ।[४]

इति तैत्तिरीयश्रुतिरभिधत्ते यत् यस्माज्जायत इदं जगत् उत्पन्नं च सत् येन द्वारा स्थितं भवत् लीयते च यस्मिन् तद् ब्रह्म ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।[५]

---

१ - तैत्तिरीयोपनिषत् २ ।४ ।५

२ - तैत्तिरीयोपनिषत् २ ।४ ।५

३ - शारारिकमीमांसा १ ।१ ।१३

४ - तैत्तिरीयोपनिषत् ३ ।१

५ - श्वेताश्वतरोपनिषत् ६ ।८

इति श्रुतिर्वक्ति यत् त्सय परस्य ब्रह्मणः विविध प्रकारवत्यः पराशक्तयः श्रूयन्ते तस्यज्ञानबबलयोः क्रियाः स्वाभाविकरूपेण भवन्ति परमात्मन एव वाचको वर्तते भ गवच्छब्द्ःतस्यार्थ निरूपणम् महर्षिः पराशरोप्याह श्रीमत् विष्णुपुराण - शूध्दे महाविभ ूत्याख्यै परे ब्रह्मणि शब्द्यते। मैत्रेय  भगवच्छब्द सर्वकारणकारणे ॥[1] सम्भर्तेति तथाऽभ र्ता   गकारोऽर्थद्वयान्वितः। नेता गमयिता स्त्रष्टा  गकारोऽर्थस्तथा मुने ॥[2]

एश्वर्यस्य समग्रसय वीर्यस्य यशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि।

स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥

एभिश्श्लोकैः परमात्मनः सर्वकारणकारणत्वं सकलजगन्नेतृत्वं सकलजगत्भर्तृत्वं स्त्रष्टृत्वमखिलैश्वर्ववीर्यतेजयशोज्ञानवैराग्याश्रयत्वं सर्वस्य जगत् अन्तरात्मत्वं च भवति प्रतिपादितः।[3]

---

१  - श्रीविषणुपुराण ६।५।७२

२ - श्रीविषणुपुराण ६।५।७३-७५।

३ -छान्दोग्योपनिषत् ८।१।५।

एष आत्माऽपहतपाप्माविग्रेरोवमृत्युरविशोकोऽविजिधत्सोऽपिपासः सत्यकामः सत्यसंकल्पः। इति श्रुतिःभगवंतमखिलहेयप्रत्यनीकमखिलकल्याण गुणाकरञ्च वक्ति।[१]
न तत्समश्चाभ्यधिकश्च दृश्यते।

इति श्रुतिः पतमात्मनः समाभ्यधिकतहितत्वं प्रतिपादयति।

सदेव सैाम्येदमग्रआसीदेकमेवाद्धितीयम्।[२]

ब्रह्म वा इदमग्र आसीत्।[३] आत्मा वा इदमेक एवाग्र आसीत्।[४]
एको ह वै नारायण आसीत्।[५]
इत्यादिकाः कारणवादिन्यःश्रुतयः तस्य परस्य ब्रह्मणो जगतोऽभिन्ननिमित्तोपादनतामद्धितीयतां नारायणशबदवाच्यतां च प्रतिपादयन्ति। जन्माद्यस्य यतः।[६]

---

१ – श्वेताश्वतरोपनिषत् ६।८।

२ – छान्दोग्योपनिषत् ६।२।१।

३ – बृहदारण्यकोपमिषत् १।४।१।

४ –ऐतरेयेपनिषत्आत्मषट्क १।।

५ –महोपनिषृत् १।१

६ –शारीरकमीमांसा १।१।२

इति शारीरकसूत्रमपि  ब्रह्मणो जगत्कारणत्वं प्रतिपादयति तथा भ

ूतस्यास्य ब्रह्मणः।

जगत्सर्वं शरीरं ते ।[१]

यस्यात्मा शररिम्।[२]

यस्य पृथिविशरीरम्।[३]

इत्यादिकां श्रुतयः जगच्छरीरत्वं प्रतिपादयन्ति। तदिदं सकलं जगत् परस्य ब्रह्मणो व्याप्यभूतमिति। ईशावास्यमिदं सर्वमितिश्रुतिर्बूते।[४]

**माया निरूपणम् ः-**

भगवतः शक्तिविशेषरूपिणी जीवानां समक्षतः परमात्मस्वरूपनिरोधकर्त्री माया स्वभावतो ज्ञानशून्या विकारास्पद च भवति।इयमेव प्रधान-प्रकृति -अचित् अविद्यादिशब्देनाभिधयिते ह्यनीशा इयमेव जीवान् मोहयति श्रुतिरिमां भोग्यशब्देनाभि धीयते।

---

१ वाल्मीकीयरामायण  - युध्दकाण्ड

२- बृहदारण्यकोपनिषत् ३।७।२२

३- बृहदारण्यकोपनिषत् ३।७।३

४ ईशावास्योपनिषत् ।१।

भोक्ताभोग्य प्रेतितारञ्च मत्वा ।[1]

यस्मात् कारणादियं विकारास्पदा वृति तस्मात् क्षरमितयभिधीयते तथा च श्रुतिः। क्षरंप्रधान ममृताक्षरं हरः।[2]

इति इयं शुध्दसत्वम् :- त्रिपाद्विभूयिरित्यादिकैः शबदैरभिधीयते यथा प्रतिपादितं पुरुषसूक्ते । त्रिपादस्यामृतं दिवि ।[3]

कठोपनिषदः श्रति र्वक्ति ।

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।[4]

अचितो द्वितीयो भेदः मिश्रसतवं वर्तते इदं हि सत्वरजस्तमोरूपगुणत्रययुक्तः बध्दचेतनानां ज्ञाननन्दयोस्तिरोधाय- कम् नित्यम् ईश्वरस्य क्रीडापरिकरभूतं प्रेदशभ ेदेनकालेभेदेन च सदृशानां -

---

१ -श्वेताश्वतरोपनिषत् १। १२।

२ -श्वेताश्वतरेपनिषत् १।१०

३ -पुरुषसूक्तम् ३।

४ कठोपनिषत् ५।१५

विकारणा। जनकं प्रकृति मायाविद्या शब्दैरभिधीयते तदिदमचिद् विशेष एव। अनीशया शोचति मुह्यमानः ।[1] इति श्रुतै तत् अनीशा शब्देनोच्यते परमात्मनो नियाम्य भूतत्वात्तस्याः। अजामेकाम्।[2]

इति श्रुतै सा अजेत्यभिधीयते।

गैारनाद्यन्तवती जनित्रीभूतभाविनी।[3] इति श्रुतै सा प्रसवित्री अभिधयिते।

सेयं माया विकाराणां जनकत्वात् प्रकृतिरित्यभिधीयते ज्ञान विरोधीत्वादविद्येति निगद्यते विचित्रसृष्टिकरत्वान्मायेति प्रोचयते। प्रलयकाले या सत्वरजस्तमसां साम्यवस्था भवति सैवावस्था प्रकृतिरित्यभिधीयते तस्याः प्रकृतेः विषमो यो हि विकारसः प्रथमो भवति महान् तस्मादहंकारो जायते सात्विकराजसतामस भेदात् तत्र सात्विकस्थावरं नाम वेकारिकः राजसाहंकारस्यापरं नाम तैजसः तामसाहंकारस्य चापरं नाम भूताद्यहंकारः वैकारिकाहंकारादेकादशेन्द्रि -याणि जायन्ते तामसाहंकारत् पंचतन्मात्रां पञ्चमहाभूतानां च भवत्युत्पत्तिः भूतानां सूक्ष्मावस्थैव तन्मात्र शब्देनाभिधीयते राजसाहंकारस्तु सात्विक तामसाहंकारयोः स्वस्वकार्यों सहायको वृति

---

१ -मुडकोनिषत् ३।१।२

२ -श्वेताश्वतोपनिषत् ४।५ ३ -मंत्रिकोपनिषत् ।४।

सइत्थं प्रकृतिर्भवति चतुर्विंशति तत्वात्मिका आचितः तृतीयोभेदः॥कालोभवति स च जगति नित्यः श्रीवैकुण्ठेतु परमात्मनः क्रीडापरिकरभूतो भवति।

उपनिषदां द्वितीयो वर्ण्योविषयोऽसित हिततत्वम् हितशब्देनसाधनान्युच्यन्ते परमात्मप्राप्तेः कानि साधनानि सन्ति इति हितविचारणावसते विचार्यते शास्त्रानुसारेण तु कर्मयोगः ज्ञानयोगः भक्तियोगः इत्येतानि हितरूपेण सन्तिनिरूपिता उपनिषत्सु।

**जीवस्वरूप निरूपणम् :-**

तत्त्वत्रयस्य द्वितीयं तत्त्वं जीवो विद्यते स एव चेतन चित् प्रत्यक् आत्मा इत्यादिभिः शब्दैरुच्यते इति प्रागपि कथितम्। तस्यैतस्यजीवसय निरूपणं श्रुतयः निम्नांक्तिेन प्रकारेण कुर्वन्ति तथा हि :- हृदयाान्तज्योर्तिः पुरुषः इति श्रुतिः आत्मनः हृत्प्रदेशस्थितिः स्वयंप्रकाशकत्वं च प्रतिपादयति अनेनास्यजडत्वं भवत्यभभिहतम्। अजडत्वं हि नाम ज्ञानमन्तराऽपि स्वतोभासमनतवम् यस्मात् कारणादयमात्मा हृदयप्रदेशात्दुत्क्रामति गच्छति च तेषु तेषु लोकेषु आयाति च पुनर्मर्त्यलोके तस्मादयमात्मा अणुपरिमाणकः वक्ति च तथा शाररिकं सूत्रम्।

उत्क्रान्ति गत्या गतीनामिति। तथा चात्र श्रुतयो व्रन्ति।[1]

हृदि एष आत्मा ।[2]

अयमात्मा हृत्प्रदेशे निवसतीतयर्थः । प्रद्योतेनैव आत्मा निष्कामति चक्षुषो वा मुध्र्नो वा अत्येभयो वा शरीरेभ्यः। इति श्रुतिरात्मनो शरीरदेशादुत्क्रमणं।

ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति।[3]

इति श्रुति शरीरादुत्क्रान्तानां जीवाना। चन्द्रादिलोकेषुगमनम् तस्माल्लोकात् पुनरेत्यस्मैलोकाय कर्मणे । इति श्रुतिः चन्द्रादिलोकेभ्यःमत्र्यलोकागमनम् च प्रतिपादयति।

एषोऽणुरात्मा चेतसा वेदितव्यः।[4]

बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीव स विज्ञयेःस चानन्त्याय कलपते॥

---

१ -शारीरकमीमांसा २।३।२०

२ -प्रश्नोपनिषत् ३।६

३ -बृहदारण्यकोपनिषत् ६।८।२१

४ -मुण्डकोपनिषत् ३।१।९

एषोऽणुरात्मा चेतसा वेदितव्यः।[1]

बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीव स विज्ञयेःस चानन्त्याय कलपते ॥[2]

इति च श्रुतिः जीवस्याणुपरिमाणत्वं प्रतिपादयति न चात्र अणुपरिमाणक आतमा चेत् - हृदयप्रदेशे तिष्ठति तर्हि शिरसि मे वेदना पादयोः सुखमिति कथमनुभवतीति वाच्यम्। मणिद्युमणिदीपादीनां क्वचिदवस्थानेऽपि प्रभायाः सर्वत्रैकरूपेण व्याप्तिवज्ज्ञानस्य सर्वत्रैकरूपेण व्याप्त्या तदनुभवो न विरुधयते तथा चोक्तं भगवता बादरायणेन शारीरक मीमांसायाम्।

गुणाद् वलोकवदिति।

भगवद्गीतायां भगवान् श्रीकृष्णोजीवस्याचछेद्यत्वम-दाह्यत्वमक्लेद्यत्वमशोष्यत्वं नित्यत्वं च निम्नांकितैः श्लोकैः।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

न चैनं क्लेदयन्तयापो न शोषयति मारुतः॥[3]

---

१ -श्वेताशवतरोपनित् ५।९

२ -शारीरकमीमांसा २।३।२६

३ -श्रीमद् भगवद्गीता २।२३-२४

अच्छेद्योऽमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽय॥ सनातनः॥

ज्ञानस्वरूपोऽयमात्मा ज्ञानवान् भवतीति। यो वेदेदं जिघ्राणीती स आत्मा ।इत्यादिकाः श्रुतयः आत्मने ज्ञातृत्वं प्रतिपादयन्ति। किञ्च यद्यात्मा ज्ञानाश्रयो नो भवेत् तदा ज्ञानमहमिति अनुभवेत् न तु जानाम्यहमिति ज्ञातृतवाबेवास्य कतृत्वं भोक्तृत्वं च भवति श्रुतिरपि आत्मनो भोक्तृत्वमभिधत्ते । भोक्ता भोग्यं प्रेरितारं च मत्वा।[1]

इति वाक्ये शारीरक मीमांसायामपि जीवस्य कतृत्वमभिहितम्

कर्ताशास्त्रार्थवत्वात् ।[2] इति सूत्रेण। विज्ञानं यज्ञं तनुते ।[3]

इति श्रुतिः आत्मनो ज्ञानमयं स्वरूपं वक्ति।

य आत्मानमन्तरो यमयति यमात्मा न वेद यस्यत्मा शरीरम् ।

इति श्रुतिरधित्ते यत् आत्मायं परमात्मको विद्यते॥ [4]

-----------------------------------------------

१ -श्वेताश्वरतोपनिषत् १।१२

२-शारीरकमीमांसा २।३।३३

३ -तैत्तिरीयोपनिषत् आनन्दवल्लि ।५॥

४ शतपथ ब्रह्मणम१ १४।५।३०

**जीवानां भेदः :-**

जीवानां सामान्यतो भेदत्रयं भवति बध्दजीवा मुक्तजीवा नित्यजीवाश्च तत्र बन्धसमायुकता जीवा बध्दा इतीरिता उच्छीन्नसंसाराजीवाः मुक्तशब्दवाच्यः भवन्ति कदाप्यनाघ्रातसंसाराः जीवाः नित्यजीवाः सन्ति। समाने वृक्षे पुरुषो निमग्न अनीशया शोचति मुह्यमानः।[१] तयोरन्यः पिप्पलं स्वादवत्ति।[२]

इति श्रुति च प्रतिपादयतः जीवानां कर्मफलभोक्तृत्वम् कर्मफल भोक्तार एव जीवा बध्दा इत्यभिधीयन्ते वयं समे संसारिणः बध्दकोटावैव स्मःआब्रह्म स्तम्बपर्यन्ताःसमे जीवा बध्दा एव एतेषां बध्दजीवानां देवतियङ्मनुष्यस्थावरभेदेन जरायुजाण्डज-

स्वेदजोद्भिजभेदेन वा चत्वारो भेदाः सम्पद्यन्ते।

प्रकृतिसंसर्ग प्रध्वंसाभाववन्तो जीवाः मुक्ताः इत्युच्यन्ते अयमाशयोयत्

परिक्ष्यलोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन।[३]

---

१ -शतपथ ब्रह्मणम१ १४।५।३०

२ -मुण्डकोपनिषद् ३।१।२

३ - मुण्डकोपनिषद् ३।१।१

इति श्रुतिर्वक्ति यत् वेदतो ब्राह्मणः कर्मजन्यस्य फलस्य परीक्षां कृवा ज्ञात्वा च तस्य नश्वरतां निश्चिनेोति मनसि यत् कृतेन कर्मणा नित्यस्य मोज्ञाख्यस्य पुरुषार्थस्य प्राप्तिर्न हि भवितुर्महति अत एव संसारान्निर्विणो भवति तदनन्तर सो वेदविदाचार्यस्य सविधे गत्वा श्रवणादि द्वारा॥

प्रायस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः।

प्राप्त्युपाय फलं प्राप्ते स्तथा प्राप्तिविरोधि च ॥

वदन्ति सकला वेदाः सेतिहासपुराणकाः।

मुनयश्च महात्मानो वेदवेदान्तवेदिनः॥[१]

इति पञ्चरात्रागम सूक्त्यनुसारेण मीमांसोक्तन्याया नामालोकेऽर्थपञ्चकविज्ञानं लभते तत्र आत्मपरमात्मनो स्वरूपयथात्म्य।

ज्ञात्वा ग़वत्प्राप्तिरूपस्य मोक्षस्यावाप्तये तैलधारावदविच्छिन्न स्मृतिसन्तानरूपां सांगां भक्तिम्॥

इति पञ्चरात्रागम सूक्त्यनुसारेण मीमांसोक्तन्याया नामालोकेऽर्थपञ्चकविज्ञानं लभते तत्र आत्मपरमात्मनो स्वरूपयथात्म्य। ज्ञात्वा ग़वत्प्राप्तिरूपस्य मोक्षस्यावाप्तये तैलधारावदविच्छिन्न स्मृतिसन्तानरूपां सांगां भक्तिम्॥

------------------------------------------------

१-पञ्चरात्रागम ईश्वरसंहिता

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वजत्नम् ।रक्षिष्यतीति

विश्वासो गोपृवत्ववरणं तथा॥[1] आत्मनिःक्षेपकारुण्यं षड्विद्या शरणागति॥ इत्युकृत्युनुसारेण प्रपत्तिमङ्गीकृत्य एतच्छरीरावसाने प्रारब्ध कर्मजन्यशरीरावसाने वा सुषुम्ना नाड्या शरीरादस्मानिःसृत्य ः

मुक्ताचिर्दिनपूर्वपक्षषडुदङ् मासाब्दवातांशुमद् [2]

ग्लेोर्विद्युत्वरुणेन्द्र धातृमहितः सीमान्तसिन्ध्वाप्लुतः।

श्रीवैकुण्ठमुपेत्यनित्यमजडंतस्मिन्परब्रह्मणः सायुज्यं समवाप्य नन्दति चिरं तेनैष धन्यः पुमान्॥ इति सूक्त्युसारेण तैस्तैरतिवाहिकैः तेषु तेषु लेकेषु नीतः सन् तत्र तत्र सम्पूजितः सीमान्तसिन्धुं तीर्त्वा श्रीवैकुण्ठलोकमुपेत्य परमात्मानं साक्षात्कृत्य आविभूतगुणाष्टकः भगवच्चरणपरिचरणैकभोगो भवति मुक्तो जीवः। प्रकृति संसर्गात्यन्ताभाववन्तो जीवा नित्या इत्याभिधियन्ते ते च सन्ति शेषशेषासनादिकाः तथा चात्र श्रुतिः तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। यत्र पूर्वे साध्या सन्ति देवाः।[3] श्रीश्च लक्ष्मीश्च पत्न्यौ इमा सर्वाः श्रुतयः नितयानं जीवानां वर्णनं कुर्वन्ति।नित्या हि जीवाः कदापि संसारे नायान्ति कदाचिद्भगवदिच्छा

---

१ - -पञ्चरात्रागम ईश्वरसंहिता

२ – वात्स्यवरदाचार्या सत्संग पद्यम्। ३ – पुरुषसूक्तम् ॥१६॥

विशेषमनुभूय संसारेऽऽयान्ति तदा स्वागमनण्येजनं पूरयित्वा पुनः परमात्मन एव लोकं यान्ति।

**कर्मयोग निरूपणम् :-**

अष्टवर्गं ब्राह्मणमुपनयीत तमध्यापयेत् इति नियमानुसारेण **यज्ञोपवीतसंस्कारानन्तरं :-**

श्रावण्यांप्रौष्ठपद्यां वा उपाकृत्य यो विधि।[1]

युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्॥ इति स्मृयनुसारेण गुरुकुलं गत्वा वेदाध्ययनं सम्पाद्य पनिः आचार्यमुखाद् जविपरमात्मनोः यथार्थ ज्ञानं सम्पाद्य शक्त्यनुसारेण फलाभिसन्धिरहितानिषिध्दकाम्यनित्यनैमित्तिकरूपगृहितकर्मविशेष -- एव कर्मयोग इत्यभिधीयते । स च देवार्चनतपस्तीर्थयात्रादानयज्ञादि

भेदभिन्न ।अयं कर्मयोगः जीवगतकल्मषापनयनद्वाराज्ञानयोगमुत्पाद्य तद्द्वारा भक्तेरुत्पादको भवति॥

---

१– मनुस्मृति ४।१५

**ज्ञानयोग निरूपणम्** :- कर्मयेगान् निर्मलान्तःकरणस्येश्वरशेषेत्वेन प्रकृतिविमुक्त –स्वात्मचिन्तन विशेष व क्षानयोग इत्यभिधीयते तस्यैतस्य ज्ञानयोगस्य भक्तौ भवति साक्षादुपयोगः ॥

**भक्तियोग निरूपणम्**

भक्तियोगो नाम यमनियमासानप्राणायामप्रत्याहारध्यान- धारणासमाधि रूपष्टांग युक्तस्तैलधारावदवच्छिन्नस्मृतिसन्तान –रूपः। स च विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुध्दर्ष –रूपसाधनसम्पृक्तानुगृहिता भक्तिर्दर्शनसमानाकार अन्तिमप्रत्यया –वधिका च भवति। स चान्तिमप्रत्ययः एतच्छरीरावसाने शरीरान्तराववसाने वा भवति । वेदनध्यानोपासनादिशब्दवाच्या भक्तिः परभक्तिपरज्ञानपरमभक्तिरूपा क्रमवति प्रपतयंगिता च जायते। उपनिषदः भक्तेः भेदभूतानां मोक्षविद्यानामपि वर्णनं कुर्वन्ति द्वात्रित्शसंख्यकानाम् ताश्च निम्नांकिताः सन्ति।

**मोक्षविद्यानां निरूपणम्** :-

**सद्विद्या**–इयं विद्या छान्दोग्योपनिषदिसदेव सैाम्यदमग्र आसीदेकमेवाद्वितीयम्। इत्यादिकाभिश्श्रुतिभिः समुपवर्णिता वर्तते इयं विद्या परस्य ब्रह्मणो जगतोऽभिन्ननिमित्तोपादानकारणत्वेनोपासनमुपदिशति ॥[१]

---

१- छान्दोग्योपनिषत् ६।२।१॥

**आनन्दविद्या** – तैत्तिरीयोपनिषदः आनन्ददवल्लायां समुपवर्णितेयं विद्या। एतसमाद् वा एतस्मादानंदमयादन्योन्तर आत्मानन्दमयः।[१]

इत्यादि श्रुतिभिः इयं विद्या आनन्दमयत्वेन ब्रह्मणोपासनं विधत्ते । य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णः तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणीतस्योदिति नाम स एष सर्व पाप्मभ्य उदितः। इति श्रुत्या अस्यां विद्यायां ब्रह्मणोऽतिमनोज्ञम् समुपवर्णितमुपास्यतवेन ॥[२]

**आकाशविद्या** – छान्दोग्योपनिषदि[३] अस्य लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि ह्म वा इमानि भूतानि आकाशादेवसमुतपद्यन्ते आकाश प्रत्यस्तं यान्ति आकाशो ह्यो वैभ्यो ज्यायानाकाश एव परायणम् ।इति श्रुत्या विद्येयंसमुपवर्णिता अस्यां विद्यायां परस्य ब्रह्मण आकाशशरीरत्वकेन परं प्रकाशत्वेन चोपासनं विहितम ॥

**प्राणविद्या** - छान्दोग्योपनिषदि[४] सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिह्वते। इति श्रुत्या समुपर्णिता प्रतिपादयति यत् प्राणशरीरकत्वेन ब्रह्मण उपासना विधेयेति।

---

१ – तेत्तिरीयोपनिषत् आनन्दवल्ली ।५। अनुवाक

२- छान्दोग्योपनिषदि १।९।१

**३**- छान्दोग्योपनिषदि १।११।५

**४** –छान्दोग्योपनिषदि ३।१३।७

**गायत्रीज्योतिर्विद्या -** अथ यदहः परो दिवो ज्योतिः दीप्यते विश्वतः पृष्ठेषु अनुत्तमेषुत्तमेषु लोकेषु इदं वाव तद् यदिदम् स्मिनन्तः पुरुषो ज्योतिः। इति श्रुत्या समुपवर्णिता इयं विद्या प्रतिपादयति यत् गायत्रा अपि अधिष्ठाता परं ब्रह्मैव विद्येति।[१]

**इन्द्रप्राण विद्या -** प्रतर्दनो ह व दैवोदासिः इन्द्रस्य प्रियं धामोपजगाम युध्देन च पौरुषेण च। इत्यादिकया श्रतया समुपकान्तेयं विद्या वक्ति यत् परमत्मन एव इन्द्रादिकानां चेतनाचेतनानामात्मत्वेनोपासनीयत्वमिति।[२]

**शाण्डिल्यविद्या -** छान्दोग्योपनिषदि[३] सर्वखल्विदं ब्रह्म तज्जलानिति शान्त उपासित अथ खलु क्रतुमयोऽयं पुरुषो यथाक्रतुस्मिन् लोके पुरुषो भवति - - तथेतः प्रेत्य भवति स क्रतु कुर्वित मनोमयः प्राणशरीर। इत्यादिका श्रुत्यास्ति समुपवर्णितरयं विद्या इयं विद्या बृहदारण्यके अग्निरहस्येभपि समुपवर्णिता।

---

१- छान्दोग्योपनिषत् ३।१३।७

२- कोषितक्युपनिषत् ३।१

३- कोषितक्युपनिषत् ३।१

विद्योपदिशति यत् उपासनामयोऽयं जीवः अस्मिन् लेके यादृशप्रकारविशिष्टं ब्रह्मोपासते प्रेत्य सः तादृशप्रकारविशिष्टमेव ब्रह्म लभते अनुभवति च

**नाचिकेचसविद्या** - अस्याः विद्यायाः अपरं नाम अतृविद्याऽपि वर्तते। कठेपनिषदः ।[१]

यस्य ब्रह्म च क्षेत्रं चोभे वृत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यमः सः।[२] इति श्रुतिर्वक्ति यजगतोऽस्य लयो वृति परस्मिन्नेव ब्रह्मणि।उपकोसलविद्या - छान्दोग्योपनिषदः [३] -य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमेतदभ यमेतद ब्रह्म। इत्यादिका श्रुत्या समुपवर्णितेयं विद्या प्रतिपादयति यत् संयद्वामत्वादि गुणकं ब्रह्मैव अय एव तस्यैव सकलगुणगणाकररूपेणोपासना कर्तव्या ।

---

१- कठोपनिषत् २।२५

२- छान्दोग्योपनिषत् ३।१४।१-२

३ - छान्दोग्योपनिषत् ४।१५।१

**अन्तर्यामिविद्या** - बृहदारण्यकोपनिषदः[४]- यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम् यः पृथिवीमन्तरो यमयत्येष त आन्मान्तर्यामि अमृतः। इत्यादि श्रुत्या वर्णियति यत् सकस्यान्तर्यामीरूपेणोपासना विधेया।

**अक्षरविद्या-**[२] अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यग्राहयमगोत्रमब्राह्मणचक्षुः श्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः । इत्यादिकया श्रुत्या समुपवर्णितेयं ब्रह्मविद्या परस्यैव ब्रह्मणः परत्वमक्षरत्वञ्च विधाय तस्योपासनां करणीयत्वेनोपदिशति।

**वैश्वानरविद्या-** वैश्वानरः साधारण शब्द विशथषात्। इति शारीरकसूत्रे वर्णितेयं यत्[३]।आत्मान मेवेमं वैश्वानरं सम्प्रत्यधयेषि।इति श्रुत्योपवर्णितवैश्वानरविद्या प्रतिपादयति यत् वैश्वानर शरीरकत्वेनोपास्यमस्ति हि ब्रह्म।[४]

- - - - - - - - - - - - - - - - - - - - -

१ - बृहदारण्यकोपनिषद ५।७

२- मुण्डकोपनिषत् २।१।१

३- शारीरकमीमांसा १।२।२५ ४- छान्दोग्योपनिषत् ५।११

**भूमविद्या-** - भूमासम्प्रसादादध्युपदेशात्। इति शारीरकसूत्रेण विवेचिता।[1]

यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा। इति श्रुत्या समुपवर्णितेयं विद्या परस्यैव ब्रह्मणो वैपुल्यमापादयति।[2]

**गार्ग्यक्षरविद्या -** अक्षरमम्बरान्तधृते । इति सूत्रेण समालोचिता ।[3] एतद्वैतदक्षरं गार्गि ।इति श्रत्योपवर्णितेयं विद्या प्रतिपादयति यदम्बरस्यापि आकाशस्यापि कारणं ब्रह्मैवेति ।[4]

प्रणवोपास्यपरमपुरुषविद्या- प्रश्नोनिषदि विद्येयं समुपवर्णिता अत्र श्रुतिः वर्णीति यत् मुक्तानामपि जीवानां भोग्यमस्तीश्वरः।

**दहरविद्या -** दहर उत्तरेभ्यः । इति सूत्रेण विवेचितायामस्यां विद्यायां वर्णितमस्ति दपहतपाप्मात्वादिविशिष्टं परं ब्रह्मैवास्ति।[5]

---

१-शारीरकमीमांसा १।२।७

२- छान्दोग्योपनिषत् ७।२४

३- शारीरकमीमांसा १।३।९।

४- बृहदारण्यकोपनिषत् ५।८

५- शारीरकमीमांसा१।३।१४

**अंगुष्ठप्रमितविद्या-** शबदादेव प्रमितः। इति शारीरकसूत्रेण महर्षिर्बादरायणः प्रत्यपीपद यत् कठोपनिषदः अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति इति श्रुतयोपवर्णितेयं विद्या परस्य ब्रह्मणः सम्पूर्णजगन्नियामकत्वं वक्ति।[१]

**देवोपास्यज्योतिर्विद्या-** देवताधिकरणस्य [२] - तदुपर्यपि बादरायणं सम्भवात् । इति सूत्रेण वर्णितं यद् देवानामपि ब्रह्मोपासनयामधिकारो वर्तते।

**मधुविद्या-** अस्यां विद्यायां प्रतिपादितमस्ति यत् वसु रुद्र -आदित्य - मरुदादिकानां ब्रह्मैवात्मैति बादरायणोऽपि । - मध्यादिष्वसम्भवादनधिकारं जैमिनिः। इति सूत्रेण समर्थयामास।[३]

**संवर्गविद्या -** विद्यामिमां भगवान् बादरायणः शारीरकममिमांसायाः - शुगस्य तदानादर श्रवणतात् तदाद्रवणात् सूच्यते । इत्यादिके सूत्रे मीमांसितवान् इतिपादयामास च छान्दोग्येपनिषदः इयं विद्या भगवान्सर्वेषामधिकारानुसारेण भवति उपास्य इति।

---

१-शारीरकमीमांसा १।३।२३

२ - शारीरकमीमांसा १।१।३३।

३ - शारीरकमीमांसा १।४।११।

**अजाशरीरकविद्या-** छान्दोग्योनिषदि वर्णितायां अस्याः विद्याया अभिप्रायोऽस्ति यत् भगवान् एष प्रवृत्तेर्नियन्ता वर्तत इति विद्या ज्योतिषां ज्योतिर्विद्येत्यभिधीयतेविद्यामिं व्याचकार भगवान् बादरायणः। न संख्योपसंग्रहादपि नान भावादतिरेकाच्च। इत्यस्मिन् सूत्रे।[1]

**बालाकिविद्या** - विद्येयं कौषितकि ब्राह्मणे बृहदारण्यकोपनिषदि च वर्णिता वर्तते अस्याः विद्यायाः वर्णनं भगवान् बादरयणः शारीरकमीमांस अस्यां विद्यायां जगतोऽभिन्ननिमित्तोपदानकारणसय परस्य ब्रह्मणेपास्यत्वमस्तीति वर्णितम्।

**मैत्रेयिविद्या** - अस्यां महर्षिः याज्ञवल्क्यः प्रतिपादिवान् यत् परमात्मसाक्षात्कार एव मोक्षस्यसाधन मस्ति । बृहदारण्यकोपनिषद् अस्यां विद्यायां विवेचनं महर्षिर्बादरायणः शारीरकमीमांसायाः।

**द्रुहिणरुद्रादिशारीरकविद्या**[2] - एतेन सर्वे व्याख्याता व्याख्याता । इत्यस्मिन् शारीरके सूत्रे महर्षिर्बादरायणः इमां विद्यां व्याचकार अस्यां विद्यायां भगवतः - - - - - - - - -

-----------------------------------------------------

१ - शारीरकमीमांसा १।४।१९।

२- शारीरकमीमांसा १।४।२९

देवानामप्युपास्यत्वं प्रतिपादितमस्ति।

**पञ्चाग्निविद्या** - छान्दोग्य - बृहदारण्यकोपनिषदोः वर्णितेयं विद्या प्रतिपादयतः। यत् प्रसन्नो भगवान् एव संसारबन्धनाद् विमोचयति ।[1] - तदन्तर प्रतिपत्तौ रंहति सम्परिष्वक्तः। इत्यादिकेषु सप्तसु शारीरकसूत्रेषु व्याचकार भगवान् बादरायणः।

**आदित्यस्थाहर्नामकविद्या**- इयं बृहदारण्यकोपनिषदो विद्यते भगवान् नारायण एव आदित्यमण्डलस्थान्तर्यामि विद्यते इत्येवास्ति विद्याया आस्याः प्रतिपाद्यो विषयः विद्यामिमां ।सम्बन्धादेवमन्यत्रापि।[2] इत्यादिकेषु सूत्रेषु विचारयामास भगवान् बादरायणः।

**अक्षिस्थाहन्नामकविद्या** - इयं विद्या बृहदारण्यकोपनिषदो विद्यते अत्र भगवतः पुण्डरीकाक्षत्वमस्ति प्रतिपादितम्।

**पुरुषविद्या**- बृहदारण्यकोपनिषद अस्यां विद्यायामस्ति प्रतिपादितं यत् भगवान् नारायण एव परमपुरुषोऽस्ति।[3] पुरुषविद्यायामपिचेतरेषामिति । सूत्रे चकार

---

१ - शारीरकमीमांसा ३।१।१

२ - शारीरकमीमांसा ३।३।२०

३-शारीरकमीमांसा ३।३।२३

महर्षिर्बादरायणः। ईशावास्यविद्या- इयं विद्या ईशावास्योपनिषदि वर्णिताऽस्ति अत्र परस्य ब्रह्मणो जगद् व्यापकत्वमस्ति वर्णितम् ।[१] - ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विध्दनम्॥ इत्यादिभिः श्रुतिभि ः महर्षिर्बादरायणो विद्यामिमां पुरुषार्थाधिकरणे विवेचिवान्।

**उषस्तिकोहलविद्या** -बृहदारण्यकोपनिषदः विद्यायामस्यां प्रतिपादितमस्ति यत् भगवतः प्रसन्नतायै भोजनादिकस्य नियमपालनमप्यावश्यकं भवति । सर्वान् नानुमत्यधिकरणे महर्षिर्बादरायणः विद्यामिमां व्याचकार । सर्वान्ननुमतिः[२] प्राणात्यये तद् दर्शनात् । इत्यादिभिः।

**न्यासविद्या** - अस्यां विद्यायां ब्रह्मणो व्याहृति शरीरकत्वं मन्त्रमयत्वं चास्तिप्रतिपादितम् ।

नानाशब्दादिभेदात्[१]। इति सूत्रे महर्षिर्बादरायणो विद्यामिमां व्याचकार।

इमा सर्वा उपनिषत्सुवर्णिता विद्या उपासनारूपाः सन्ति अत एव भक्तेः कोटावेवाटीकन्ते।

---

१-ईशावास्योपनिषत् । १।

२ -शारीरकमीमांसा ३।४।२८ ३-शारीरकमीमांसा ३।३।६१